एकादशः पाठः
११

# सुभाषितानि



पिबन्ति नद्यः स्वयमेव नाम्भः, स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति शस्यं खलु वारिवाहाः, परोपकाराय सतां विभूतयः ।। १ ।।

भवन्ति नम्रास्तरवः फलोद्गमैः, नवाम्बुभिर्भूरि विलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः, स्वभाव एवैष परोपकारिणाम् ।। २ ।।



पापान्निवारयति योजयते हिताय, गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले, सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।३ ।।

यः प्रीणयेत् सुचरितैः पितरं स पुत्रो, यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
यन्मित्रमापदि सुखे च समक्रिय एव, एतत्त्रयं जगति पुण्यकृतो लभन्ते ।।४ ।।



उदेति सविता रक्तो, रक्तश्चास्तमये तथा ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ।। ५ ।।

जननी जन्मभूमिश्च, जाह्नवी च जनार्दनः ।
जनकः पञ्चमश्चैव, जकाराः पञ्च दुर्लभाः ।। ६ ।।



गच्छन् पिपीलिको याति योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि, पदमेकं न गच्छति ।। ७ ।।

न चौरहार्यं न च राजहार्यं, न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं, विद्याधनं सर्वधनं प्रधानम् ।।८ ।।

अल्पानामपि वस्तूनां, संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः ।।९ ।।

उत्सवे व्यसने प्राप्ते, दुर्भिक्षे शत्रुसङ्कटे ।
राजद्वारे श्मशाने च, यस्तिष्ठति स बान्धवः ।। १० ।।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| नद्यः | सरिताः | नदियाँ |
| शस्यं | अन्नम् | अन्न को |
| वारिवाहाः | मेघाः | बादल |
| सतां | सज्जनानाम् | सज्जनों का |
| विभूतयः | सम्पदः | सम्पत्तियाँ |
| तरवः | पादपाः | वृक्ष |
| फलोद्गमैः | फलोत्पत्तिभिः | फल लगने से |
| भूरि | अत्यधिकम् | बहुत अधिक |
| घनाः | मेघाः | बादल |
| अनुद्धताः | विनम्राः | विनम्र |
| निवारयति | दूरी करोति | हटाता है |
| योजयते | नियोजयते | जोड़ता है |
| आपद्गतं | विपत्तिकाले | संकट के समय |
| जहाति | त्यजति | छोड़ता है |
| ददाति | यच्छति | देता है |
| लक्षणम् | पहचानचिह्नानि | लक्षण |
| सन्तः | सज्जनाः | सन्तों ने |
| प्रीणयेत् | प्रसन्नं करोति | प्रसन्न करता है |
| भर्तुः | स्वामिनः | पति |
| कलत्रम् | भार्या | पत्नी |
| आपदि | विपत्तिकाले | संकट के समय |
| समक्रियः | समव्यवहारः | समान व्यवहार वाला |
| पुण्यकृतो | पुण्यात्मा | पुण्यशाली |
| रक्तः | ताम्रवर्णः | लाल रंग का |
| महताम् | महाजनाम् | महापुरुषों का |

| | | |
|---|---|---|
| याति | गच्छति | जाती है |
| वैनतेयः | गरुडः | गरुड़ |
| जननी | अम्बा | माँ |
| जन्मभूमिः | जन्मस्थानम् | जन्मस्थान |
| जाह्नवी | भागीरथी | गंगा |
| हार्यं | चोरणीयम् | चुराने योग्य |
| भाज्यं | विभाजनं | बाँटना |
| भारकारि | भारस्वरूपा | भार स्वरूप |
| वर्धते | वृद्धिं प्राप्नोति | बढ़ता है |
| संहतिः | सङ्गठनम् | संगठन |
| तृणगुणत्वमापन्नैः | अल्पतृणानि मिलित्वा | छोटे –छोटे तिनके मिलकर |
| दन्तिनः | गजः | हाथी |
| उत्सवे | उत्सवसमये | उत्सव के अवसर पर |
| व्यसने प्राप्ते | सङ्कट काले | विपत्ति के समय |
| दुर्भिक्षे | अकालसमये | अकाल के समय |
| राजद्वारे | राज्ञः द्वारे | राजा के द्वार पर |
| श्मशाने | शवदाहस्थाने | श्मशान में |
| बान्धवः | सुहृदः | मित्र |

## अभ्यासः

### मौखिकप्रश्नाः

१. **अधोलिखितानां शब्दानाम् उच्चारणं कुरुत –**

नद्यः नादन्ति वारिवाहाः नम्रास्तरवः नवाम्बुभिर्भूरि अनुद्धताः

निगूहति यद्भर्तुरेव एवास्तमेति शतान्यपि भातृभाज्यं यस्तिष्ठति

सन्मित्रलक्षणमिदं तृणैर्गुणत्वमापन्नैः।

२. **अधोलिखितप्रश्नानाम् उत्तराणि वदत -**

(क) स्वयमेव अम्भः के न पिबन्ति ?

(ख) उदयकाले सवितुः वर्णः कीदृशः ?

(ग) सर्वधनं प्रधानम् किं ?

(घ) तृणैः गुणत्वमापन्नैः के बध्नन्ते ?

(ङ) मित्रं कस्मात् निवारयति ?

(च) कः श्रेष्ठः पुत्रः ?

## लिखितप्रश्नाः

१. **अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत -**

(क) फलोद्गमैः वृक्षाः कथं भवन्ति ?

(ख) सम्पत्तौ च विपत्तौ च केषाम् एकरूपता ?

(ग) सन्मित्रं कुत्र योजयते ?

(घ) का श्रेष्ठा भार्या ?

(ङ) चौरहार्यं किं नास्ति ?

२. **अधोलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखतु -**

(क) स्वयं फलानि के न खादन्ति ?

(ख) परोपकारिणां स्वभावः कीदृशः भवति ?

(ग) पञ्च जकाराः के सन्ति ?

(घ) सन्मित्रलक्षणं के प्रवदन्ति ?

(ङ) के त्रयं जगति पुण्यकृतो लभन्ते ?

(च) केषां संहतिः कार्यसाधिका ?

३. **रिक्तस्थानस्य पूर्तिं कुरुत -**

(क) ................................ .......... सतां विभूतयः।

(ख) अनुद्धता सत्पुरुषाः ................................ ..... ।

(ग) सन्मित्रलक्षणमिदं ................................ .. सन्तः।

(घ) गच्छन् पिपीलिको याति योजनानां ........................।

(ङ) विद्या धनं सर्वधनम् ………………………………।

(च) ………………………… वस्तुनां संहतिः कार्यसाधिका।

(छ) यस्तिष्ठति स ………………………………।

४. **अधोलिखितानां शब्दानां पर्यायवाची शब्दान् लिखत -**

**यथा-** अम्भः - जलम्

(क) तरुः - ……………………

(ख) सविता - ……………………

(ग) जाह्नवी - ……………………

(घ) जनकः - ……………………

(ङ) जननी - ……………………

(च) दन्तिनः - ……………………

(छ) मित्रं - ……………………

५. **अधोलिखितशब्दानां सन्धिविच्छेदं कुरुत -**

**यथा -** नाम्भः - न + अम्भः

(क) नवाम्बुभिः - …………………… + ……………………

(ख) परोपकाराय - …………………… + ……………………

(ग) फलोद्गमैः - …………………… + ……………………

(घ) एवैषः - …………………… + ……………………

(ङ) शतान्यपि - …………………… + ……………………

(च) पापान्निवारयति - …………………… + ……………………

(छ) भर्तुरेव - …………………… + ……………………

(ज) नम्रास्तरवः - …………………… + ……………………

(झ) यस्तिष्ठति - …………………… + ……………………

६. अधोलिखितपदानां धातुं लकारं पुरूषं वचनं च लिखत -

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| उदाहरण - | पिबन्ति | पा | लट् | प्रथमः | बहुवचनम् |
| (क) | खादन्ति | ............ | ............ | ............ | ............ |
| (ख) | भवन्ति | ............ | ............ | ............ | ............ |
| (ग) | करोति | ............ | ............ | ............ | ............ |
| (घ) | ददाति | ............ | ............ | ............ | ............ |
| (ङ) | वदन्ति | ............ | ............ | ............ | ............ |
| (च) | लभन्ते | ............ | ............ | ............ | ............ |
| (छ) | तिष्ठति | ............ | ............ | ............ | ............ |